IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# न्यायदर्शने जातिपदार्थः

**सौभिकनस्करः**

शोधछात्रः, संस्कृतविभागः, जवहरलालनेहेरुविश्वविद्यालयः

'जन्' धातोः कर्त्तृवाच्ये 'क्तिच्' प्रत्ययेन 'जाति' शब्दः सिद्धः, अर्थाद् यद् जायते तद् जातिः। वस्तुतः जातिशब्दः नानार्थे प्रयुज्यते। अमरकोशे जातिशब्दस्य जायमानार्थः सामान्यार्थः च प्राप्यते[1]। वैशेषिकदर्शने तु 'जातिः' सामान्यार्थैव व्यवहृयते, अर्थाद् गोत्वम्, ब्राह्मणत्वम्, घटत्वम् आदयः सामान्यार्थे जातिविशेषः, किन्तु 'जात्या ब्राह्मणः' इत्यत्र जायमानार्थैव जातिशब्दः प्रयुज्यते। योगसांख्यदर्शनेऽपि जायमानार्थैव जातिशब्दः व्यवहृयते। न्यायदर्शनेऽपि गोत्वाद्यर्थे जातिशब्दस्य प्रयोगः प्राप्यते, किन्तु आचार्यगौतमेन न्यायसूत्रस्य प्रथमसूत्रे षोडशपदार्थानां तत्त्वज्ञानात् मोक्षप्राप्तेः आलोचनावसरे षोडशपदार्थेषु पञ्चदशपदार्थनयेन यः पारिभाषिकजातिशब्दः उल्लिख्यते सः एव पारिभाषिकशब्दः अत्र आलोचनीयः। अत्र यद्यपि पारिभाषिकशब्दनयेन जातिपदार्थः आलोच्यते, किन्तु भाष्यकारवात्स्यायनेन पारिभाषिकशब्देन सह जायमानार्थेऽपि जातिः गृह्यते[2], कारणम् जातिपदार्थेण प्रतिवादिना वादिपक्षे प्रतिषेधः जायते, एतादृशविषयस्य आलोचना परवर्त्यांशे विस्तृतरुपेण प्रदास्यामि, अत्र केवलं प्रसङ्गक्रमे सामान्योल्लेखनं प्रदीयते। पुनः आचार्यगौतमेन जल्पपदार्थस्य लक्षणं प्रदीयते यत्, प्रमाणैः तर्केण छलजातिनिग्रहस्थानैः च साधनम् उपालम्भश्च जल्पः, अर्थात् स्वपक्षसाधनार्थं परपक्षखण्डणार्थं च जात्यादिपदार्थानां ज्ञानं आवश्यकम्। एतदर्थं आचार्यगौतमेन छलपदार्थस्य लक्षणानन्तरं जातिपदार्थस्य लक्षणं प्रदीयते। आचार्यगौतमेन जातिपदार्थस्य लक्षणं प्रदीयते यत्, साधर्म्येण वैधर्म्येण च अर्थात् केवलं साधर्म्यग्रहणेन केवलं वैधर्म्यग्रहणेन वा प्रत्यवस्थानं प्रतिषेधः वा जातिः[3]।

भाष्यकारवात्स्यायनेन लक्षणे प्रयुक्तस्य 'प्रत्यवस्थानम्' शब्दस्य अर्थः 'प्रसङ्गः' इति स्वीकृतः। पुनः भाष्यकारेणैव प्रसङ्गशब्दस्य सामान्यार्थः भणितम्, उपालम्भः प्रतिषेधः वा। 'प्रतीयम् अवस्थानम् प्रत्यवस्थानम्' अनेन व्युत्पत्त्याधरेण वादिनः प्रतिकुले प्रतिवादिनः यत् अवस्थानं तद् प्रत्यवस्थानम्, अर्थात् विजयप्राप्तार्थं प्रतिवादिनः उपालम्भः एव प्रत्यवस्थानम् इति, अतः आचार्यवात्स्यायनेन आख्यातम् वादिना सद्हेतुना स्वपक्षस्थापनानन्तरं प्रतिवादिना यदि वादिप्रयुक्तदृष्टान्तपदार्थस्य साधम्म्यग्रहणेन वैधम्म्यग्रहणेन वा वादिस्थापितपक्षः प्रतिषिध्यते तर्हि सः जातिपदवाच्यः, अतः पञ्चदशपदार्थजातिः जल्पे वितण्डायां वा प्रयुक्तः प्रतिवादिनः असदुत्तरविशेषः[4]।

भाष्यकारवात्स्यायनेन जातिपदार्थभाष्ये 'उदाहरणसाधर्म्येण', 'उदाहरणवैधर्म्येण' च एतादृशप्रयोगः कृतः, अतः अत्र शङ्का जायते यद्– केवलं वादिप्रयुक्तदृष्टान्तपदार्थस्य साधर्म्यग्रहणेन वैधर्म्यग्रहणेन वा प्रतिवादिनः प्रत्यवस्थानमेव जातिः, अथवा दृष्टान्तभिन्नपदार्थस्य साधर्म्यग्रहणेन वैधर्म्यग्रहणेन वा प्रत्यवस्थानमपि जातिः भवितुं शक्यते?

समाधानम्, भाष्यकारेण यद्यपि केवलं दृष्टान्तस्य साधर्म्यग्रहणेन वैधर्म्यग्रहणेन वा जातिपदार्थः आलोच्यते, किन्तु न केवलं दृष्टान्तस्य अपि तु दृष्टान्तभिन्नस्य कोऽपिपदार्थस्य साधर्म्येण वैधर्म्येण वा प्रत्यवस्थानमपि जातिः भवति। वस्तुतः गौतमोक्तसूत्रस्य व्याख्या प्रदानार्थं स्पष्टरुपेण उदाहरणविशेषज्ञापनार्थं वा भाष्यकारेण एतादृशी आलोचना प्रदीयते। तस्याः आलोचनायाः तात्पर्यं न तु केवलं वादिप्रयुक्तदृष्टान्तस्य साधर्म्यग्रहणेन वैधर्म्यग्रहणेन वा प्रत्यवस्थानम्।

---

[1] "जातिर्जातं च सामान्यम्।" अ० को०, 1/4/31, पृ०23

[2] "प्रत्यनीकभावाज्जायमानोऽर्थो जातिरिति।" न्या० द०2, वा०भा०, 1/2/18 , पृ० 681

[3] "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः।" न्या० द०2, 1/2/18 , पृ० 681

[4] "प्रयुक्ते हि हेतौ यः प्रसङ्गः जायते सा जातिः।..............................प्रत्यनोकभावाज्जायमानोऽर्थो जातिरिति।" न्या० द०2, वा० भा०, 1/2/18 , पृ० 681

भाष्यकारवत् वार्तिककारोद्योतकरेणापि वादिप्रयुक्तदृष्टान्तस्य साधम्यग्रहणेन वैधम्यग्रहणेन वा प्रत्यवस्थानरुपजातिपदार्थः आलोच्यते, किन्तु अत्रापि अस्याः आलोचनायाः तात्पर्यं न तु केवलं वादिप्रयुक्तदृष्टान्तस्य साधम्यग्रहणेन वैधम्यग्रहणेन वा प्रत्यवस्थानम्। अत्रापि वार्तिककारोद्योतकारेण भाष्यकारवत् आचार्यगौतमोक्तप्रत्यवस्थानरुपजातेः उदाहरणविशेषज्ञापनार्थं एतादृशी आलोचना प्रदीयते।

वार्तिककारोद्योतकारेणापि महर्षिगौतमोक्तजातिलक्षणं ग्रहणेन सह भाष्यकारवत् आलोचनापि प्रदत्ता। ग्रन्थकारेण निगदितं, यत्र वादिना पञ्चावयववाक्यप्रयोगेण स्वपक्षः स्थाप्यते, किन्तु प्रतिवादिना यदि साधर्म्यग्रहणेन वैधर्म्यग्रहणेन वा वादिप्रयुक्तपक्षस्य खण्डनं क्रियते, तर्हि सः जातिपदार्थः, अर्थात् यत्र परपक्षखण्डनार्थं व्याप्तेः ग्रहणं न क्रियते, अथवा व्याप्त्याश्रयः न गृह्यते, अपि तु साधर्म्यता वैधर्म्यता वा गृह्यते सः जातिपदवाच्यः, अतः जातिः केवलं प्रतिवादिनः असदुत्तरविशेषः। वाचस्पतिमिश्रेण स्वकीयतात्पर्यटीकायां पुनः आचार्यजयन्तभट्टेनापि स्वरचितन्यायमञ्जरीग्रन्थे उपर्युक्तजातिलक्षणं स्वीकृयते, एतयोः ग्रन्थयोः वार्तिककारतः कापि भिन्नालोचना न प्राप्यते[5]।

उपर्युक्तग्रन्थकारैः साधर्म्याधारेण वैधर्म्याधारेण प्रत्यवस्थानमेव जातिनयेन स्वीकृतम्, तर्हि केवलं 'प्रत्यवस्थानमेव जातिः' इति जातिलक्षणं स्वीकरणीयम्, साधर्म्यवैधर्म्याभ्यां ग्रहणस्य किं तात्पर्यम्?

समाधानम्, केवलं प्रत्यवस्थानं यदि जातिपदार्थस्य लक्षणं भवति तर्हि छलादिस्थाने अतिव्याप्तिदोषः उद्भवति। कारणं जातिप्रयोगेण यथा परपक्षस्य प्रतिषेधः जायते तथैव छलेनापि परपक्षस्य प्रतिषेधः जायते, हेत्वाभासेनापि परपक्षः प्रतिषिध्यते, पुनः सम्यकप्रतिषेधः जातिलक्षणाक्रान्तः भवति, एतदर्थं एतादृशातिव्याप्तिदोषः निवारणार्थं लक्षणे महर्षिगौतमेण 'साधर्म्यवैधर्म्याभ्यां' पदं सन्निविष्ट्यते।

केवलं 'साधर्म्यवैधर्म्याभ्यां जातिः' इति यदि जातिलक्षणं स्वीकृयते, तर्हि किं भवति? अर्थात् 'प्रत्यवस्थानं' पदस्य ग्रहणस्य किं तात्पर्यम्?

समाधानम्, मुख्यतः जल्पे वितण्डायां च परपक्षस्य खण्डनार्थं जातेः प्रयोगः प्राप्यते, अतः यदि प्रत्यवस्थानं पदं न स्वीकृयते तर्हि परपक्षखण्डनमपि न भवितुं शक्यते, एतादृशः असम्भवदोषः निवारणार्थं महर्षिगौतमेन लक्षणे प्रत्यवस्थानं पदं सन्निविष्ट्यते।

मध्यनैयायिकैः जातिपदार्थस्य किञ्चित् भिन्नालोचना प्रदीयते। एवं ध्यातव्यं यद्– एतैः नैयायिकैः न तु प्राचीनमतानि खण्डितानि अपि तु प्राचीनमतैः सह नवीनविशेषणानां वैशिष्ट्यानां वा संयोजनं कृतम्। एतेषु मध्यनैयायिकेषु अन्यतमः अस्ति आचार्यभासर्वज्ञः। आचार्यभासर्वज्ञेन स्वकीये न्यायसारग्रन्थे न्यायभूषणे च जातिपदार्थस्य लक्षणं आख्यातं वादिना सद्हेतुप्रयोगेण स्वपक्षस्थापनानन्तरं प्रतिवादिना वादिप्रयुक्तहेतौ समीकरणाभिप्रायेण यः प्रतिषेधः सः जातिपदार्थः[6]। लक्षणे प्रयुक्तसमीकरणशब्दस्य अर्थः प्रतिवादिना अविशेषः समानं वा प्रतिपादनम्, अर्थात् प्रतिवादिना वादिप्रयुक्तहेतुना सह स्वपक्षहेतोः समानरुपताप्रयोगोद्देश्येन वा जातिः प्रयुज्यते।

जातिप्रयोगेण परपक्षस्य दूषणमेव जायते, अतः ' प्रसङ्गो जातिः' लक्षणं स्वीकरणीयम्? अर्थात् लक्षणे प्रयुक्तविशेषणानां ग्रहणस्य किं तात्पर्यम्?

समाधानम्, छलादिस्थाने अतिव्याप्तिदोषः निवारणार्थम् अन्यविशेषणानि प्रयुज्यन्ते। कारणं जातिप्रयोगेण यथा परपक्षस्य प्रतिषेधः जायते तथैव छलेनापि परपक्षः उपालम्भ्यते। एतदर्थं एतादृशातिव्याप्तिदोषनिवारणार्थं आचार्यभासर्वज्ञेण उपर्युक्तसम्पूर्णलक्षणं प्रदीयते।

पुनः प्रश्नः जायते यत्, यदि 'समीकरणाभिप्रायेण प्रतिषेधः' इति जातिलक्षणं स्वीकृयते तर्हि किं भवति?

---

[5] क.''साधर्म्येण प्रत्यवस्थानं वैधर्म्येण प्रत्यवस्थानं जातिरिति।...............भष्ये तूदाहरणसाधम्यम् उदाहरणवैधम्यं चोदाहरणार्थमिति, यथा चोदाहरणेन एवमनुदाहरणेनापीति।''
न्या० द०2, न्या० वा०, 1/2/18 , पृ० 681

ख. ''प्रतीयमवस्थानं प्रत्यवस्थानम्................यः प्रसङ्गः जायते स जातिरिति।''
न्या० द० 2, न्या०वा०ता०टी०, 1/2/18 , पृ० 682

ग. ''अत्र त्रैकाल्यसमादिसकलविशेषसंग्रहाय.......................परप्रयुक्ते हेतौ जायमानत्वात् जातिरित्यभिधीयते।'' न्या० म०2, जातिप्रकरणं 1/2/18, पृ०176

[6] ''प्रयुक्ते हेतौ समीकरणाभिप्रायेण प्रसङ्गः जातिः।'' न्या० सा०, न्या० भू०, पृ०342

समाधानम्, यदि 'समीकरणाभिप्रायेण प्रतिषेधः' इति जातिलक्षणं स्वीकृयते, तर्हि प्रत्यक्षाभासे अतिव्याप्तिदोषः उद्भवति। एतादृशः प्रत्यक्षाभासरुपातिव्याप्तिदोषः निवारणार्थं आचार्यभासर्वज्ञेण जातिलक्षणे 'प्रयुक्ते हेतौ' इति विशेषणं संयोज्यते, कारणं प्रत्यक्षाभासे हेतोः अभावः एव दृश्यते।

पुनः 'समीकरणाभिप्रायेण' इति पदस्य ग्रहणस्य किं तात्पर्यम्? अर्थात् यदि केवलं 'प्रयुक्ते हेतौ प्रसङ्गः' इति जातिलक्षणं भवति, तर्हि किं भवति?

समाधानम्, हेत्वाभासे अतिव्याप्तिदोषः निवारणार्थं आचार्यभासर्वज्ञेन जातिलक्षणे 'समीकरणाभिप्रायेण' इति पदं गृह्यते, कारणं हेत्वाभासेनापि वादिप्रयुक्ते हेतौ दोषोद्भावनेन वादिपक्षस्य प्रतिषेधः दृश्यते, एतदर्थं एतादृशातिव्याप्तिदोषः निवारणार्थं आचार्यभासर्वज्ञेन 'समीकरणाभिप्रायेण' पदं सम्मिलितम्। अनेन सम्पूर्णलक्षणं प्रतिष्ठितम्।

लक्षणप्रयुक्तानन्तरं आचार्यभासर्वज्ञेन लक्षणे प्रयुक्तप्रसङ्गस्य द्विविधत्वं स्वीकृतम्, यथा– साधर्म्येण प्रसङ्गः वैधर्म्येण प्रसङ्गश्च, अर्थात् साधर्म्यग्रहणेन वैधर्म्यग्रहणेन च प्रसङ्गः उपालम्भः वा जातिः, अतः जातिः असदुत्तरविशेषः। अत्र एवं ध्यातव्यं यत्, न्यायसारटीकाकारवासुदेवसूरिमहोदयेन जयसिंहसूरिमहोदयेन च स्वकीयटीकायां आचार्यभासर्वज्ञोक्तजातिलक्षणे अव्याप्तिदोषस्य उद्भावनं क्रियते। तत्र भणितम् प्राप्तिसमाप्राप्तिसमादिजातिषु ग्रन्थकारोक्तलक्षणं न संगच्छते, कारणं लक्षणे उक्तसमीकरणविशेषणस्य प्रवृत्तिः एतेषु जातिप्रभेदेषु न जायते।

मध्यवर्तिनैयायिकेषु तार्किकरक्षाकारवरदाराजः अन्यतमः। ग्रन्थकारेण स्वकीयतार्किकरक्षाग्रन्थे जातिपदार्थालोचनावसरे सर्वप्रथमतः महर्षिगौतमोक्तजातिलक्षणे दोषम् आरोपितम् अनन्तरं स्वकीयलक्षणं प्रतिस्थापितम्। साधर्म्येण वैधर्म्येण च प्रत्यवस्थानं जातिः इति महर्षिगौतमोक्तजातिलक्षणम् उपरि आलोच्यते। आचार्यवरदाराजेन भणितं लक्षणमिदं सत्प्रतिपक्षहेत्वाभासे वाधहेत्वाभासे च संगम्यते। कारणं सत्प्रतिपक्षहेत्वाभासे साधर्म्येण वैधर्म्येण च खण्डनं दृश्यते, वाधहेत्वाभासेऽपि उक्तविषयः प्राप्यते। अतः महर्षिगौतमोक्तजातिलक्षणं अतिव्याप्तिदोषेण दृष्टम्। पुनः उत्कर्षसमादिजातिषु महर्षिगौतमोक्तजातिलक्षणं न फलितम्। कारणं उत्कर्षसमादिजातिषु साधर्म्येण वैधर्म्येण च प्रत्यवस्थानं न प्राप्यते। अतः लक्षणमिदम् अव्याप्तिदोषेणापि दुष्टम्। ग्रन्थकारेण उक्तरूपदोषोद्भावनानन्तरम् आख्यातं महर्षिगौतमोक्तजातिलक्षणं न तु विशिष्टलक्षणम् अपितु उपलक्षणमात्रमिति। तार्किकरक्षाकारवरदाराजेन उदयनाचार्यकृतजातिलक्षणं अङ्गीकृतं प्रतिस्थापितं च। ग्रन्थकारेण जातिलक्षणं प्रदत्तं यद्– स्वव्याघातकम् उत्तरं जातिः। अर्थात् यद् उत्तरं परपक्षेण सह स्वपक्षस्यापि व्याघातकं भवति सा जातिः। प्रथमे वादिना प्रतिवादिसम्मुखे मध्यस्थसम्मुखे च स्वपक्षः उपस्थाप्यते। अनन्तरं प्रतिवादिना वादिस्थापितपक्षे दोषोद्भावनार्थं जात्युत्तरं प्रयुज्यते किन्तु जात्युत्तरं प्रकृतपक्षे वादिपक्षखण्डने असमर्थः भवति। अनेन कारणेन वादिनापि प्रतिवादिप्रयुक्तवाक्ये दोषोद्भावनं कर्तुं शक्यते। अतः प्रतिवादिप्रयुक्तजात्युत्तारं परोक्षभावेण स्वपक्षव्याघातकं भवति इति[7]।

न्यायरत्नकाराचार्यमणिकण्ठमिश्रेण स्वकीयन्यायरत्ने प्रथमे विविधजातिलक्षणानां खण्डनं कृत्वा अनन्तरं स्वकीयलक्षणं प्रतिष्ठितम्। ग्रन्थकारेण प्रथमतः यानि सिद्धानि दूषणानि तत्र असर्थमुत्तरम् जातिः इति लक्षणं खण्डितम्। कारणं ग्रन्थकारेण उक्तलक्षणे अव्याप्तिदोषः स्वीकृतः। अर्थात् यदि घटशब्दयो कृतकत्वरूपसाधर्म्यात् शब्दः अनित्यः भवति तर्हि आकाशशब्दयोः विभुत्वात् शब्दः नित्यः किमर्थं न भवति? उक्तरूपदूषणं न तु सिद्धं किन्तु प्रतिवादिना उक्तदूषणं जात्युत्तररूपेण प्रयुज्यते।

द्वितीयतः स्वव्याघातकमुत्तरम् इति जातिलक्षणमति खण्डितम्। सामान्यतः येन रूपेण परपक्षस्य दूषणं जायते तेनैव रूपेण स्वपक्षस्यापि व्याघातकमेव स्वव्याघातकं सा च जातिः। किन्तु प्रतिपक्षे निरालम्भानुमाने सत्प्रतिपक्षदोषः प्राप्यते न तु स्वव्याघातकता इति। अर्थात् वादिना 'रजतप्रत्ययः सालम्बनः प्रत्ययत्वात्, घटवत्' इति स्वपक्षस्थापनानन्तरं प्रतिवादिना यदि 'रजतप्रत्ययो निरालम्बनः प्रमेयत्वात्, घटवत्' इति प्रतिपक्षः प्रतिस्थाप्यते तर्हि तत्र स्वव्याघातकता न प्राप्यते अपि तु उक्तनिरालम्बनानुमाने सत्प्रतिपक्षदोषः प्राप्यते।

तृतीयतः अङ्गवैकल्योपन्यासमन्तरेण प्रमाणदूषणोद्भावनमपि जातित्वेन न गृहीतम्। अत्र ग्रन्थकारेण भणितं लक्षणोक्तः यः आङ्गवैकल्योपन्यासः सः तात्पर्यकोपन्यासः अथवा तत्प्रतिपादकोपन्यासः? यदि तात्पर्यकोपन्यासः गृह्यते तर्हि तत्र तात्पर्ये युक्तिदोषात् जातित्वं सम्भाव्यते किन्तु तात्पर्ये जातित्वं न स्वीकार्यम्। पुनः यदि तत्प्रतिपादकोपन्यासः गृह्यते तर्हि तत्रापि हेतूदाहरणाधिकस्य अपि जातित्वं सम्भाव्यते किन्तु तत्रापि जातित्वं न स्वीकार्यम्। अतः लक्षणं इदं दोषयुक्तमिति।

चतुर्थतः असाधकत्वाव्याप्येनासाधकत्वसाधनमुत्तरं इति जातिलक्षणमपि खण्डितम्। अत्र असाधकत्वव्याप्तेनाप्यसाधकतासाधने उक्तिदोषात् जातित्वं सम्भाव्यते। अतः लक्षणं इदं दोषयुक्तम्।

---

7 ''अथान्ये तु स्वव्याघातकमुत्तरम् ।।'' ता० र०, 2/1 , पृ० 157

आचार्यमणिकण्ठमिश्रेण उपर्युक्तचर्तुविधलक्षणखण्डनानन्तरं स्वकीयजातिलक्षणं प्रतिष्ठापितम्। ग्रन्थकारेण आख्यातं वादिना व्याप्तिसम्वन्धाधारेण स्वपक्षस्थापनानन्तरं प्रतिवादिना व्याप्तिं पुरष्कृत्य अर्थात् विनापि व्याप्तिसम्वन्धेन वादिनः असाधकत्वस्य साधनाभिप्रायेण प्रयुक्तमुत्तरम् एव जातिः। अर्थात् वादिना यः विषयः न साध्यते तस्य विषयस्य साधनार्थं प्रयुक्तं व्याप्तिं पुरस्कृत्योत्तरं जातिः। सामान्यतः वादिस्थापितपक्षस्य कस्यापि पूर्वपक्षस्य वा दूषणार्थं प्रयोजकीभूतोत्तरमेव जातिः, यः वाक्यान्तरविशेषः एव वा। किन्तु उक्तजात्युत्तरम् असदुत्तरमेव।

नव्यनैयायिकविश्वनाथाचार्येण जातिपदार्थविषये प्राचीनसिद्धान्तः मध्यवर्तिसिद्धान्तश्च अङ्गीकृतः, अर्थात् व्याप्तिनिरपेक्षसाधर्म्येण व्याप्तिनिरपेक्षवैधर्म्येण च दूषणाभिधानं प्रतिषेधः वा जातिः, एतादृशः प्राचीनसिद्धान्तः गृहीतः, पुनः स्वव्याघातरुपमध्यवर्तिसिद्धान्तः अपि आचार्यविश्वनाथेन स्वीकृतः। सिद्धान्तद्वयस्य विस्तृतालोचना पूर्ववर्त्यशें प्रदीयते, एतदर्थं अत्र केवलं नाममात्रेण उल्लेखनं क्रियते, किन्तु आचार्यविश्वनाथेन एकस्याः शङ्कायाः उल्लेखनं कृतं यत्, महर्षिगौतमोक्तजातिलक्षणस्य कः घटकः? अर्थात् साधर्म्यवैधर्म्यीभयाभ्यां प्रत्यवस्थानं जातिलक्षणस्य घटकः, अपि तु केवलं साधर्म्येण प्रत्यवस्थानम्, केवलं वैधर्म्येण प्रत्यवस्थानं वा जातिलक्षणस्य घटकः?

समाधानम्, एतयोः यदि प्रथमपक्षस्य ग्रहणं जायते, अर्थात् यदि साधर्म्यवैधर्म्यभ्यां प्रत्यवस्थानं जातिलक्षणस्य घटकनयेन स्वीकृयते, तर्हि प्रत्येकप्रत्यवस्थाने जातिलक्षणस्य अव्याप्तिः भवति, अर्थात् प्रतिवादिनः साधर्म्यमात्रेण प्रत्यवस्थाने जातिलक्षणस्य अव्याप्तिः भवति, पुनः वैधर्म्यमात्रेण प्रत्यवस्थानेऽपि जातिलक्षणस्य अव्याप्तिः भवति।

द्वितीयपक्षस्य ग्रहणस्थानेऽपि अव्याप्तिदोषः प्राप्यते, अर्थात् यदा साधम्येण प्रत्यवस्थानं जातिनयेन गृह्यते तदा वैधर्म्येण प्रत्यवस्थाने अव्याप्तिदोषः उद्भवति। पुनः यदा वैधर्म्येण प्रत्यवस्थानं जातिनयेन स्वीकृयते तदा साधर्म्येण प्रत्यवस्थाने अव्याप्तिदोषः प्राप्यते।

पुनः यदि साधर्म्यवैधर्म्यान्यतरस्य प्रत्यवस्थानं जातिः इति स्वीकृयते, तर्हि किं भवति? यदि एतादृशलक्षणमपि गृह्यते, तर्हि तत्रापि अव्याप्तिदोषः प्राप्यते, कारणं साधर्म्यसमवैधर्म्यसमजातिव्यातिरिक्तः भिन्नजातिपदार्थे एतादृशलक्षणं न संगच्छते, तर्हि जातिपदार्थस्य लक्षणं किम्?

समाधानम्, अतः व्याप्तिनिरपेक्षतया प्रत्यवस्थानं दूषणाभिधानं वा जातिपदवाच्यः, उक्तलक्षणे न कोऽपि दोषः प्राप्यते[8]।

अत्र प्रश्नः जायते यद्– जातिप्रयोगेण वादिस्थापितपक्षे दोषोद्भावनं सम्भाव्यते न वा? अर्थात् वादिस्थापितपक्षस्य प्रत्यवस्थानं भवितुं शक्यते न वा?

समाधान्, उपर्युक्तसर्वग्रन्थकारैः जातिपदार्थविषये स्वीकृतम्, प्रथमे वादिना पञ्चावयववाक्येन अर्थात् सदहेतुना स्वपक्षः स्थाप्यते, अनन्तरं प्रतिवादिना साधर्म्यग्रहणेन वैधम्यग्रहणेन वा वादिपक्षः प्रतिषिध्यते, किन्तु प्रकृतपक्षे प्रतिवादिनः जातिप्रयोगेण वादिपक्षस्य प्रतिषेधः न जायते, कारणं जातिपदार्थः असदुत्तरविशेषः। एतदर्थं जातिपदार्थस्य परपक्षप्रतिषेधसामर्थ्यः नास्ति, अतः प्रतिवादिना वादिपक्षस्य प्रतिषेधबुद्धिवशतः जातिः प्रयुज्यते, अनेन कारणेन वार्तिकारोद्यतकरेण वाचस्पतिमिश्रेण च 'प्रतिषेधहेतुः' इति उच्यते, अर्थात् जातिपदार्थः नाम वादिपक्षप्रतिषेधहेतुः, अथवा वादिपक्षप्रतिषेधासार्थहेतुः प्रतिषेधसामर्थाभावत्वात्। वस्तुतः प्रतिवादिना स्वपक्षस्थापनार्थं प्रयुक्तहेतुः न तु जातिपदार्थः अपि तु प्रतिवादिना प्रयुक्तवादिपक्षप्रतिषेधहेतुः प्रतिषेधासमर्थहेतुः वा एव जातिपदार्थः[9], अतः प्रतिषेधबुद्धिवशतासदुत्तरत्तात् प्रतिवादिना जातिप्रयोगेण वादिस्थापितपक्षस्य खण्डनं न भवितुं शक्यते।

अत्र प्रश्नः भवितुं शक्यते, यदि प्रतिवादिना जातिप्रयोगेण स्वपक्षस्यैव खण्डनं जायते, पुनः यदि जातिपदार्थस्य प्रयोगः असदुत्तरविशेषः तर्हि प्रतिवादिना जातिपदार्थः किमर्थं प्रयुज्यते?

---

[8] ''क्रमप्राप्तां जातिं लक्षयति साधर्म्येति। साधर्म्यवैधर्म्याभ्यामिति सावधारणो निर्देशः.......................तथा च छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितम्।''

न्या० सू० वृ०:, 1/2/18, पृ०348

[9] क. ''तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्त यः प्रतिरोधासमर्थो हेतुः।''

न्या० वा०, 5/1/1, पृ०529

ख. ''तत्रजातिर्नामेति, प्रतिषेधबुद्धा प्रयुक्त इति शेषः।''

न्या०वा०ता०टी०, 5/1/1, पृ०406

सताधानम्, वस्तुतः लाभपूज1ाख्यातिप्राप्तार्थमेव परपक्षखण्डनार्थमेव प्रतिवादिना जात्यादिपदार्थानां प्रयोगः क्रियते। विजयप्राप्तार्थं एतादृशासदुत्तरस्य प्रयोगः सूकरः प्रयोगः इति, अर्थात् सुप्राचीन्कालतः विजयप्राप्तार्थं प्रतिवादिनः एतादृशप्रयोगः प्राप्यते। कारणं प्रतिवादिना निग्रहस्थानस्य प्रयोगानन्तरं यदि वादिना तद् निग्रहस्थानं न उद्भाव्यते न ज्ञायते वा तर्हि प्रतिवादिनः एव विजयः भवति। एतादृशविजयप्राप्तार्थमेव प्रतिवादिना असदुत्तरविशेषजातिपदार्थः प्रयुज्यते।

उपर्युक्तालोचनायां प्राप्यते यत्, जातिपदार्थः असदुत्तरविशेषः। पुनः यद्यपि प्रतिवादिना वादिस्थापितपक्षखण्डनार्थं दूषणार्थं वा जातिः प्रयुज्यते, किन्तु अनेन जातिप्रयोगेण प्रकृतपक्षे वादिस्थापितपक्षस्य दूषणं न जायते। एतादृशन्यायदर्शनप्रतिष्ठितसिद्धान्ताधारेणैव बौद्धनैयायिकधर्मकीर्तिमहोदयेन स्वकीयन्यायविन्दुग्रन्थे जातिपदार्थस्य लक्षणं प्रदीयते यत्, न दूषणम् अपि तु दूषणाभासः एव जातिपदार्थः[10]। वादिना स्वपक्षस्थापनानन्तरं प्रतिवादिना यद् उत्तरं प्रदीयते तद् न तु दूषकः अपि तु दूषकतुल्यः एव, अर्थात् प्रतिवादिप्रयुक्तोत्तरेण वादिपक्षस्य दूषणं खण्डनं वा न जायते, किन्तु दूषणतुल्यार्थं दूषणाभासनाम्ना अभिधीयते।

**सन्दर्भग्रन्थसूची–**


क. अञ्जना; न्यायभूषण का अनुमान परिच्छेद; दिल्ली– 110053; जे.पी.पब्लिशिंग हाउस, प्रथमसंस्करणम् 2002 ई।

ख. आचार्यः, सम्पत्कुमारः; तार्किकरक्षा–सारसंग्रहः (विवृतिटीका संवलितः); तिरुपतिः, हरिप्रिया प्रकाशनम्; प्रथमसंस्करणम्– 2004 ई।

ग. झा, किशोरनाथः; श्रीउदयनग्रन्थावलिः, प्रथमभागः, द्वितीयभागः; मुम्बाई– 400051, रमा आर्ट्स, ; 2011 ई।

घ. ठाकुरः, अनन्तलालः; न्यायदर्शनम् 2, प्रथमाध्यायत्मकः प्रथमभागः (भाष्य–वार्तिक–तात्पर्यटीका–परिशुद्धिसमन्वितः); दारभाङ्गा, मिथिलाविद्यापीठः; 1967 ई।

ङ. तर्कवागीशः, फणिभूषण; न्यायपरिचयः; कलकाता– 700013, पश्चिमवङ्ग राज्य पुस्तक पर्षत्; तृतीयसंस्करणम् 2006 ई।

च. तर्कवागीशः, फणिभूषणः; न्यायदर्शनम्, प्रथमखण्डम्1; कलिकाता–700056, पश्चिमवङ्ग राज्य पुस्तक पर्षत्; षष्ठसंस्करणम् 2018 ई।

छ. द्विवेदी, विन्ध्येश्वरीप्रसादः; तार्किकरक्षा (सारसंग्रहटीका, निष्कण्टकाटीका लघुदीपिकाटीका च समन्विता); वाराणसी, मेडिकलहालप्रेसः; 1903 ई।

ज. योगीन्द्रानन्दः; न्यायभूषणम्; वाराणसी, षड्दर्शनप्रकाशनप्रतिष्ठानम्; प्रथमसंस्कारणम् 1968 ई।

झ. विद्याभूषणम्, सतीशचन्द्रः; न्यायसारः (न्यायतात्पर्यदीपिकाटीकासह); कलिकाता, एशियाटिक सोसायटी; 1910 ई।

ञ. शास्त्री, दयाशङ्करः; उद्योतकर का न्यायवार्तिक एक अध्ययन; वाराणसी, चौखाम्वाविद्याभवनम्; प्रथमसंस्करणम्– 2004 ई।

ट. सेख, सावीर आलि; न्यायसूत्रवृत्तिः; कलकाता– 700006, संस्कत पुस्तक भाण्डार; प्रथमसंस्करणम् 2015 ई।


[10] ''दूषणाभासास्तु जातयः। अभूतदोषोद्भावनानि जात्युत्तरणीति।''
न्या० वि०, तृतीयपरिच्छेदः, पृ० 34